# Shri Matangi Stotra Pushpanjali

# શ્રીમાતઙ્ગીસ્તોત્રપુષ્પાઞ્જલિઃ

## Document Information

Text title : Matangi Stotra Pushpanjali

File name : mAtangIstotrapuShpAnjalI.itx

Category : devii, dashamahAvidyA, devI

Location : doc_devii

Transliterated by : Lalitha Parameswari parameswari.lalitha at gmail.com

Proofread by : Lalitha Parameswari, NA

Latest update : June 2, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીમાતઙ્ગીસ્તોત્રપુષ્પાઞ્જલિઃ

અસ્તિ નાનાવિધંશસ્તં વસ્તુનાવૈણિકેન વઃ ।
અમૃતામ્બુનિધેર્મધ્યે માણિક્ય દ્વીપમાશ્રયે ॥ ૧॥

સુધાતરઙ્ગ સઞ્ચારિમારુતસ્પર્શ શીતલમ્ ।
કલ્પદ્રુમકદમ્બાલિ પારિજાતપટીરકૈઃ ॥ ૨॥

નિવડીકૃતમુધાનં નિષેવેનિર્ભરોત્સવમ્ ।
તદલસલતોન્મીલત્કુસુમામોદ મેદુરમ્ ॥ ૩॥

જાગર્તિ માનસે મત્કેતરુણં નીપકાનનમ્ ।
તસ્યાન્તરાલતરલામુક્તમુક્તાલતાતતેઃ ॥ ૪॥

જ્યોતિર્મયમહન્નૌમિમહિતં રત્નમણ્ડપમ્ ।
સરસ્વત્યા ચ લક્ષ્મ્યા ચ પૂર્વાદિદ્વારભૂમિષુ ॥ ૫॥

શઙ્ખપદ્મનિધિભ્યાં ચ સતતાધ્યુષિ સંસ્તુવે ।
ઇન્દ્રાદીન્લોકપાલાન્ ચ સાયુધાન્ સપરિચ્છદાન્ ॥ ૬॥

મણ્ડપસ્યબહિર્ભાગેડપ્યષ્ટદિક્ષુ ક્રમસ્થિતાન્ ।
અથધ્યાયામિ રત્નાર્ચિરયત્નાકૢપ્તદીપિકામ્ ॥ ૭॥

હરિચન્દન સંલિપ્તાં હારિણીં મણિદીપિકામ્ ।
તત્રત્રિકોણ પઞ્ચારાષ્ટારષોડશપત્રકૈઃ ॥ ૮॥

અષ્ટાષ્ટધારવેદાસ્ત્રૈશ્ચિન્મયં વક્ત્ર મીમહે ।
તસ્યમધ્યે કૃતાનાસામ સાધારણ વૈભવામ્ ॥ ૯॥

ઇન્દુરેખાવતીમેણી લોચનાં વેણિશાલિનીમ્ ।
હાસાંશૂલ્લાસનાસીર નાસાભરણ મૌક્તિકામ્ ॥ ૧૦॥

મદરક્તકપોલશ્રી મગ્નમાણિક્ય દર્પણામ્ ।
આનન્દહારિણીં તાલિદલતાટઙ્કધારિણીમ્ ॥ ૧૧॥

ઉચ્ચપીનકુચામચ્છહારાં  તુચ્છવલગ્નકામ્ ।
સુકુમારભુજાવલ્લી વેલ્લત્કઙ્ગણરિઙ્ખણામ્ ॥ ૧૨॥

વામસ્તનમુખન્યસ્ત વીણાવાદવિનોદિનીમ્ ।
વલિનાભિનભોભૂત કાઞ્ચી હારિપ્રભાં શુભામ્ ॥ ૧૩॥

ન્યસ્તૈકચરણાં પદ્મે સલીલાસાલસાનનામ્ ।
અનર્ઘ્યલાવણ્યવતીં માદિનીં વર્ણ માતૃકામ્ ॥ ૧૪॥

અનઙ્ગ શક્તિજીવાતુ તદ્વિક્ષેપ હરાઙ્ગનામ્ ।
ત્ર્યસ્રેરતિં પ્રીતિમપિ પ્રણમામિ મનોભવામ્ ॥ ૧૫॥

દ્રાવણંરોષણઞ્ચૈવ બન્ધનં મોહનં તથા ।
અસ્ત્રમુન્માદનાખ્યં ચ પઞ્ચમં પાતુ મે હૃદિ ॥ ૧૬॥

કામરાજં ચ કન્દર્પં મન્મથં મકરધ્વજમ્ ।
મનોભવં ચ પઞ્ચાર કોણાગ્રાવસ્થિતં સ્તુમઃ ॥ ૧૭॥

બ્રાહ્મીં માહેશ્વરીં ચૈવકૌમારીં વૈષ્ણવીમપિ ।
વારાહીમપિ માહેન્દ્રીં ચ ચામુણ્ડાં ચણ્ડિકાં નુમઃ ॥ ૧૮॥

લક્ષ્મીઃ સરસ્વતીચૈવ રતિઃ પ્રીતિસ્તથૈવ ચ ।
કીર્તિશ્શાન્તિચ પુષ્ટિશ્ચતુષ્ટિરિત્યષ્ટકં ભજે ॥ ૧૯॥

વામાજ્યેષ્ઠા ચ રૌદ્રી ચ શાન્તિઃ શ્રદ્ધાસરસ્વતી ।
ક્રિયાશક્તિશ્ચ લક્ષ્મીશ્ચ સૃષ્ટિશ્ચૈવતુ મોહિની ॥ ૨૦॥

તથાપુર્ણાદિને ચાશ્વાસિનીવાલી તથૈવ ચ ।
વિદ્યુન્માલિન્યથસુરા નન્દાદ્યા નાગવદ્ધિકા ॥ ૨૧॥

ઇતિષોડશ શક્તીનાં મણ્ડલં માનયામહે ।
અસિતાઙ્ગો રુરુશ્ચણ્ડ ક્રોધનોન્મત્તભૈરવાઃ ॥ ૨૨॥

કપાલીભીષણશ્ચૈવ સંહારશ્ચેતિ પાન્ત્વમી ।
માતઙ્ગીં સિદ્ધલક્ષ્મીં ચ મહામાતઙ્ગિકામપિ ॥ ૨૩॥

મહતીં સિદ્ધલક્ષ્મીં ચ તુર્યાં ચ તદુપાસ્મહે ।
ગણનાથશ્ચ દુર્ગા ચ વટુકઃ ક્ષેત્રપોડવતુ ॥ ૨૪॥

શક્તિરૂપાણિ ચાઙ્ગાનિ મનસાઙ્ગી કરોમ્યહમ્ ।
હંસમૂર્તિઃ સ ચ પરઃ પ્રકાશાનન્દ દેશિકઃ ॥ ૨૫॥

પૂર્ણોનિત્યશ્ચવરુણઃ પાતુ માં પઞ્ચદેશિકી ।
શિવેત્વાંશેષકાદેવિ માતઙ્ગેશ્વરિ માનયે ॥ ૨૬॥

ઈક્ષે ચ માનસેમત્કે ક્ષેત્રપાલં કૃપાલયમ્ ।
શુકિની શોકનિર્હન્ત્રી સવીણાવેણિ ભાસુરા ॥ ૨૭॥

સુરાર્ચિતા પ્રસન્ના ચ સંવિદ્ભવતિ શામ્ભવી ॥ ૨૮॥

મદેનશોણા પદપાઙ્ગકોણા વિભક્તવીણા નિગમપ્રવીણા ।
એણાઙ્ક ચૂડાકરુણાધુરીણા પ્રીણાતુ વઃ પોષિત પુષ્પવાણા ॥ ૨૯॥

સંવિન્મયંરુદ્ર વસન્નતોષિનઃ સાધકીન્દ્ર ભૃઙ્ગકુલઃ ।
કમપુષ્પાઞ્જલિ રેષમતાં માતઙ્ગકન્યકા યાઃ ॥ ૩૦॥

ઇતિ શ્રીમાતઙ્ગીસ્તોત્રપુષ્પાઞ્જલિઃ સમાપ્તા ॥

Encoded and proofread by Lalitha Parameswari
parameswari.lalitha at gmail.com

*Shri Matangi Stotra Pushpanjali*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*